1430.

कोकिलदूतम्

स्वस्तिविविधबिरुदावलीबिराजमानमा
नोन्नत महाराजाधिराज द्विजराज यो-
गिराज काशिराज श्री ५ मदीश्वरीप्र-
सादनारायणसिंह शर्म्म बीरपुङ्गव धर्म्म-
पालप्रबोधितेन तदीयरूपान्तर युवरा-
ज श्री ५ प्रभुनारायणसिंह शर्म्म वीर-
पुङ्गवानुमोदितेन

वाशिष्ठ
श्रीप्रमथनाथ तर्कभूषणेन विरचितम्
प्रकाशितञ्च ।

काशीधाम्नि
अमरयन्त्रे श्रीअम्बिकाचरण चट्टोपाध्यायेन
मुद्रितम् ॥

सम्वत् १९४४

C. Ivy P.

S. Kokiladut... Benares, 1887.

उत्सर्गपत्रम् ।

आशोद्भासियशोऽधरीकृतनिशानाथप्रसन्नद्युते
क्षौणीमण्डलमण्डनायितविभो काशीशदीनाश्रय ।
विन्यस्ता भवतःसरोजकरयोर्यत्नान्मदीया कृतिः
प्रीतिश्चेत् जनयेदियं क्षणमसौ मर्त्त्यःकृतार्थस्तदा ॥

श्रीप्रमथनाथ शर्म्मा

विज्ञापनम् ।

पर्य्याप्तादिनभर्त्तुरुज्ज्वलतरा दिग्दीपिकादीधितिः
काष्ठोद्भासिसुधांशुशीतकिरणैः सन्तृप्तमुच्चैर्जगत् ।
इत्यालोक्य कदापि भूमिवलये किंसूरिभिः प्रार्थ्यते
खद्योतस्य चिराययान्तु विलयं स्निग्धोज्ज्वलारश्मयः ॥

श्रीप्रमथनाथशर्म्मणः

॥ श्री काशी ॥

कोकिलदूतम् ।

(१)

न विश्वस्य स्रष्टा न च विगतजीवस्य जननं
न पुण्यं पापं वाऽनुमितिरथवा दृष्टविषये ।
इदं पाषण्डाना मनभिमतमौग्ध्यं निरसितुं
जनि र्यस्य प्रायोजगति जयतात् सोऽनिशमजः ॥

(२)

अन्तर्वक्षप्रणयिविरहव्याकुला काऽपि बाला
काले चूतप्रसवसुरभौ पूर्णमिन्दुं विलोक्य ।
स्मारं स्मारं दयितवदनाम्भोजमम्भोजवक्त्रा
मूर्च्छां माप प्रियसहचरीक्रोड़लग्नाङ्गयष्टिः ॥

(३)

शीतैर्नीरैः शिशिरशिशिरै स्तालवृन्तीयवातै
रम्भोजिन्याः सरससुभगै गुच्छकैः सावयस्या ।
मोहच्छेदेऽवहित हृदयादीर्घ मुष्णं श्वसन्ती
सख्या स्तस्याश्चिर मथ महाव्याकुलोपाचचार ॥

(४)

एवं बाला प्रियसहचरीचर्य्यया त्यक्तमोहा
सुस्थीकर्त्तुं विकलहृदयं तत् समक्षं तदानीम् ।
नालंभूता मनसिजशराघातनिर्भिन्नचित्ता
कष्टव्यक्तिं व्यरचयदथो दुःखसम्भिन्नवाग्भिः ॥

(५)

आशा नोचेत् प्रियसखि मनोमोहयन्ती विशाला
संसारेऽस्मिन् दयितविरहाद् दुःखपूर्णेऽद्यधर्त्री ।
मत्प्राणानां शशधरसुधापानमाद्यच्चकोरे
काले कास्मात् सरलहृदयाघातशक्तिः स्मरस्य ॥

(६)

साहं धीरा त्वमपि सखिरे सैवमे प्राणरूपा
कालः सोऽयं प्रकृतिमधुरो यः पुरानन्ददायी ।
एवं चिन्तानिकरविहितोपायजालेषु सत्सु
प्राणाः कष्टं तदपि हृदयादाधनाय प्रवृत्ताः ॥

(७)

दीर्घोच्छ्वासंनयनसलिलैः सिक्तसुच्चैर्विबोधे
स्वप्नास्ते पापगमजभिया जातकम्पं प्रसुप्तौ ।
शान्त्यै यच्छत्वयि विरहिणामङ्गसुप्ताढतापं
मूर्च्छा सुगधे रहितनिखिलप्राणवृत्तिः सखीव ॥

(८)

इत्युक्त्वा सा प्रबलविरहक्लेशदीनाननश्री
मौनं यावत् प्रियतमसखीवाङ्निरुद्धा विधत्ते ।
तावत् पुष्यन्नववनलताच्छन्नमूर्त्तिः सतारं
कुञ्जप्रान्ते कुहुरिति मुहुः कोकिलो व्याजहार ॥

(९)

आकर्ण्यैवं विरहिहृदयोत्पीड़नोद्दीप्तशस्त्रं
कुञ्जागारे परभृदुदितं लब्धचेतोविकारा ।
दौत्यार्थं तं दयितनिकटे याचितुं दीनभावा
तामित्याह प्रियसहचरी सैव मुह्याढ़तापा ॥

(१०)

तीव्रे चेतोविकृतिजनिते बान्धवानां वियोगाद्
व्याधौ व्यर्थं प्रियसखि समाश्वासवाक्यं विभाव्य ।
यत्तद्रोगोपशमविषये सत्वरं कार्य्यदायि
तत् कर्त्तव्यं सदयहृदये प्रार्थना ते ममेयं ॥

(११)

आदौ स्निग्धैर्वचननिवहैः प्राणरक्षां विधाय
प्रान्तोन्मीलद्गुरुतरशुचस्तान् निरोद्धुं क्षमा चेत् ।
एवं तर्हि प्रणयवचनैः साम्प्रतं सान्त्वनं मे
नो चेत् शीघ्रं यदिह हि मया प्रार्थ्यते तद्विधेहि ॥

(१२)

शीघ्रं गच्छ प्रियसखि मम प्रार्थनातो निकुञ्जं
तूर्णं प्रत्यानय विनयिनि प्रेमवाचा न्यपुष्टम् ।
तत्रस्था वा कथय किल तं वक्ष्यमाणं मदीयं
विच्छेदाग्निज्वलित हृदयस्रावमेतद् वच स्त्वम् ॥

(१३)

कार्य्याद्दूरं हृदयदयिते भूमिनाकं प्रयाते
वङ्गीयायाः प्रियविरहजव्याधिशीर्णाङ्गयष्टेः ।
प्राणान् साधो विकलकरणान् रक्षितुंत्वं समर्थो
नीत्वा वार्त्तां दयितनिकटं चित्तखेदप्रकाशाम् ॥

(१४)

इत्येतस्मात् परभृतवर त्वां विनीता मदाली
दौत्यायेयं सदय हृदयं याचते दीनभावा ।
गन्तव्यस्ते हिमशिखरिणः सान्द्रनीहारशुभ्रै
स्तुङ्गैः शृङ्गैः परिवृतवपुः कोपि रम्यः प्रदेशः ॥

(१५)

क्वाहंतिर्य्यक् क्वचतवसखी मानवी किन्तुदौत्यं
कर्त्तुंयुक्ता सुदृढ़मनसां मानवानाङ्गणैस्तत् ।
एवंशङ्कागत मयि वृथा माकृथाः पुण्यचेतः
सिद्धंह्येतत् समयवशतः कार्य्यवैचित्र्य मादौ ॥

(१६)

कोमेलाभ स्त्वसहचरोदौत्यमेतद् विधाय
चिन्ताप्येषाहृदिसमुदिता मैवभून्मारवन्धो।
उच्चैर्यस्ते भुवनविजयी प्राणभृन्मोदकारी
रावस्त्राव: कुहुरिति ततो लभ्य मन्यत् किमस्ति॥

(१७)

तस्मादेवं परजनहितं स्वार्थसम्पर्कशून्यं
संस्थाप्यैतन्मनसि महतां चिन्तयित्वाचरित्रम्।
शम्भु स्मृत्वा प्रतिहतशतानिष्टमाशु प्रयातुं
साधो सज्जीभव हिमगिरे रम्यभावेक्षणाय॥

(१८)

आदौ मानिन् सरलमनसा प्रार्थ्यतां मत्रकुञ्जे
ये वर्त्तन्ते त्वयि सकरुणा बान्धवास्तान् प्रतीदम्।
गन्ताद्याहं सहचरवरा भूमिनाकं परार्थं
यूयं सिद्धे रनु पुनरिहा यानकामं कुरुध्वम्॥

(१९)

पश्चात् कान्तांनिजसहचरीं सादरं रुद्धवाष्पो
गाढाश्लेष प्रशमितमन:पीड़माश्वास्यकामम्।
आगन्तास्मि प्रणयिनि पुन: शीघ्रमेतत्प्रसाध्य
प्राणा धार्य्या: सुतनु विरहे मत्कृतेत्वेवमुक्त्वा॥

(२०)

अन्यानेवं निजसहचरान् प्रेमपूर्णैर्वचोभिः
संभाष्यास्माद् दयितवसतिंमे यतस्त्वाद्यगन्तुम् ।
चित्ते सम्यक् पथपरिचयं संनिधाया प्रमत्तो
यानोद्दिष्टच्चयविवरणं वच्यते यो मयादौ ॥

(२१)

गौरीभर्त्तुः शिरसिनिहितोदेहभारो ययासीत्
स्रोतोमूर्त्या भुविपरिचिता या धुनाब्रह्मसम्पत् ।
सेयं पुण्या प्रथम मखिलप्राणरक्षाविधात्री
वन्द्यागङ्गा जलधिगमनव्याकुलालोलवीचिः ॥

(२२)

नत्वातीर्त्वा त्रिदशसरितं वीचिमालाविलोलां
अन्तःस्नातै मृदुलपवनैः स्निग्धतीरप्रदेशाम् ।
ग्रामीणानां ललितनयनैः पीयमानः सतोषं
तत् प्रातीच्यं जनपद मथो गाहमानः प्रयाहि ॥

(२३)

विन्ध्यस्याद्रे स्तटभुवि महायोगिभिः सेव्यमानं
लङ्काभर्त्तुर्भुजचयवलोद्भ्रान्त कीर्त्तेर्निकेतम् ।
प्राप्योदीचीं दिशमनुगतः किञ्चिदुन्निद्रभक्ति
र्वन्दस्वोच्चैःस्मरसख मम्वैद्यनाथंततश्च ॥

(२४)

लच्यीकृत्य प्रथमत इत: पश्चिमाशामथैषत्
कौवेरीं तां दिशमनुसरेर्वत्म सौलभ्यहेतो: ।
यस्यामास्ते सुविदितपुरी पाटलीपुत्रनाम्नी
प्राचीनार्य्यान्वयसुबिमलख्यातिबिख्यापयित्री ॥

(२५)

तत्रोत्तुङ्गे स्फटिकभवने योषितां जालमार्गे
ज्योत्स्नाशुभ्रे मलयपवनासङ्ग कम्पालकानाम् ।
कान्तोत्सङ्गे निहितवपुषां कूजितं यत्नलभ्यं
प्राप्स्यत्यादौ प्रवल बिनयाभ्यर्थनं ते सतोषम् ॥

(२६)

रावस्त्रावैर्भुवि सुविदितै: कामिनां रम्यरूपिन्
कान्ताश्लेषात् सफलवपुषां वर्द्धयन्भावलीलाम् ।
निर्गच्छे स्त्वं तत इतरथा दीर्घकालं निषेव्य
व्यक्तुंशक्या नहि सुबिदिता सा पुरी सन्मनोभि: ॥

(२७)

तूर्णं नीत्वा नयनबिषयं बिष्णुपादाख्यतीर्थं
कच्चित् कालं वाहितहृदय स्तीर्थकृत्यं प्रसाध्य ।
काशीधाम्नि त्रिपुरमथनानन्दमोच्चैकभूमौ
गन्तुं चेत: कुरु दृढ़तरं पापराशिक्षयार्थी ॥

(२८)

तत्रोदीचीं दिशमतिरयात् सम्पतन्तीं प्रतीच्य
जह्नोः कन्यां शशिकरसित स्रोतसानम्रमूर्त्तिः ।
रात्रसावे जनितनिखिलप्राणिमोदः प्रसन्नः
स्वैरं साधो प्रविश भुवनेष्व द्वितीयां पुरीं ताम् ॥

(२९)

भक्त्यास्नात्वा प्रतननगरीप्रान्तजम्बीफलस्य
शान्तोद्वेगः कतिचिदनघाच्छिद्रपत्राणियत्नात् ।
संगृह्याद्भि र्विबुध सरितः कूजितैर्भक्तिपूर्णै
र्विश्वेशानं त्रिगुण रहितं पूजया तोषयाशु ॥

(३०)

यद्यप्यास्ते बहुतर मये दर्शनीयंनगर्यां
तस्यां विश्वेश्वरसुरचनानिर्म्मिताया मतुल्यम् ।
ईच्चासौख्यं तदपि भवतोनैवलभ्यं विशङ्के
कालक्षेपः क्षतिहतिकृते भावयित्वै तदङ्ग ॥

(३१)

तस्मात्साधोत्वरित हृदयेनान्नपूर्णापदाब्जे
कृत्वापूजां द्रुततरगति र्निर्गत स्तान्नगर्याः ।
प्राप्यायोध्यां कतिपय दिनैरामपादाङ्कपुण्यां
कश्चित् कालंगमय सरयूवेष्टितां विश्रमाय ॥

(३२)

विश्वस्येषत् दशमुखकुलध्वंसिनंजानकीशं
वैकुण्ठे बा जनहितकृते तत्रसाक्षाद्वसन्तं ।
भक्त्यातिथ्यैक् पुनरघजनिध्वंसकामोऽर्च्चयित्वा
याचस्वास्मात्सकलफलदात् कार्य्यसिद्धिं मदीयाम् ॥

(३३)

एवं देवं जनकतनयानेत्रराकासुधांशुं
भक्तिज्योत्स्नात्रिशदहृदयः प्रार्थ्यसंपूज्यचैव ।
स्मृत्वास्नेहात् विषमविरहव्याधिखिन्नांतदामां
यत्कर्त्तव्यं तव सुमनसोनोचितास्तत्रवाचः ॥

(३४)

इत्थं त्यक्त्वाझटिति सरयूमण्डितं कोशलं तं
चेतःस्वास्थ्यद्रुततरगतिस्तत् परं वर्त्म तीर्त्वा ।
रावस्ताद्यैर्मुदितमनसा मोदमावर्द्धयन् तं
चेतोसद्मस्थितजनपदं गन्तु मुच्चैर्यतस्व ॥

(३५)

यद्यप्यास्ते बहुजनपदो दर्शनीयो मनोज्ञः
शैलश्रेणी विमलतटिनी रम्यहर्म्यादिकस्वा ।
किन्त्वस्माकं दलितमनसां तूर्णं कार्य्यप्रसिद्धै
चेतस्तस्मा द्विघटय खग प्रार्थना ते ममेयं ॥

(३६)

गत्वाचैवं कियदयितदा पश्चिमाशामपास्य
कौवेरींतां दिशमनुसरेरीषदावक्रयायी ।
लक्षीकुर्व्वन् हिमशिखरिणं सान्द्रनीहारमाला
बद्धापीडं शिरसि कुहुरुतप्लावितव्योमवर्त्मा ॥

(३७)

आरादभ्रै रविशरदिजैश्चन्द्रिकासङ्गशुभ्रै
र्नीहाराणां ततिभि रनिशं मण्डितैस्तुङ्गतुङ्गैः ।
प्रातर्भानोः कनककिरणासङ्गसञ्जातरागैः
शृङ्गै र्नीचैः क्षतजलधरै र्व्योममार्गं लिखन्तम् ॥

(३८)

कुत्राप्युच्चैः सरलशिखरात्सान्द्रनीहारशुभ्राद्
वेगाधिक्यात् पतितमसमस्वेष्टित प्रान्तभागम् ।
गर्ज्जद्भोगिध्वनितहरितः शूलिनः पाशिलक्ष्मया
नृत्यारम्भे नुकृति कुशलं निर्झरं धारयन्तम् ॥

(३९)

उच्चैः शृङ्गात्क्वचिदविरतं पातिनोनिर्झरस्य
ग्रावासङ्गोर्द्धचलितमहाफेणिताम्भःसमूहम् ।
ग्रीष्मारम्भेऽनुगुण पवने चान्द्रिकासङ्गशुभ्रं
विभ्राणंवास्फुटदगणितं मल्लिकापुष्पगुच्छम् ॥

(४०)

पूर्णं ज्योत्स्नाधवलितदिशि व्योमलग्ने ऽस्तांशो
मेघभ्रान्त्याशिखरनिकरं वाधिताशा वितानम् ।
दृष्ट्वामौग्ध्यादनिपुणमति यस्य खिन्नान्तरात्मा
निन्दत्युच्चैः स्वमधुरकृतिध्वंसचेष्टां विधातुः ॥

(४१)

प्रायः प्रातः कमलदयिते पूर्वशैलाङ्गनस्थे
स्वर्णाभां स्तत् किरणनिकरान् शृङ्गशीर्षैर्गृहीत्वा ।
यः शुभ्राङ्गै स्तुहिनरचितैर्गैरिकाद्यै र्विचित्रै
रुच्चैर्धत्ते समधिकनकस्तम्भलक्ष्मी मतुल्याम् ॥

(४२)

यस्मिन् गौरीपति रधिनिशं व्योमलग्ने ऽस्तांशो
भ्रामं भ्रामं सह गिरिजया भूतिशुभ्रीकृताङ्गः ।
वर्त्मक्लान्तः शिखरनिलयी विस्मितैः सिद्धसंघैः
शृङ्गे शृङ्गोद्भव इतिधिया ज्ञायते नैव तत्त्वात् ॥

(४३)

नीलैः स्निग्धाञ्जनसमतनोर्गैरिकारक्तभागे
रन्तर्विद्युत्स्फुरितललितस्योन्नमद्भिर्नतस्य ।
धारासारावच्छयितवपुषोनिर्झरस्राविभिर्यैः
शृङ्गैर्लक्ष्मीं हरतिबहुशोवार्षधाराधरस्य ॥

(४४)

आसृष्टे योऽनुदिनमधुनाप्युन्नमय्योच्चशीर्षं
नेत्रे कृत्वा तपनशशिनौ लब्धवैनिद्र्ययोगः ।
पश्यन् भाग्योन्नतिमनतिजां भारतीयामवस्थां
वीतश्रद्धो हसति हरिदुद्भासिनीहारजालैः ॥

(४५)

यस्योत्तुङ्गे शिखरनिकरे वीतसंसाररागे
स्निग्धच्छायातरुव्रततपःकानने शान्तिगेहे ।
सम्प्रज्ञातक्षयितसकलासत्प्रवृत्तिप्रमोहाः
शेषं योगं विमलमनसो योगिनः संविशन्ति ॥

(४६)

उच्चैःशृङ्गे भ्रमणजनितक्लेशविक्लान्तगात्रं
तृष्णालौल्यादभिमुखगतं यत्र सारङ्गजातम् ।
अङ्गुल्यग्रैस्तरुणजलदं संविदीर्य्यात्ततोया
स्तृष्णादीनं रचयति महामोदिताः सिद्धकन्याः ॥

(४७)

यस्योन्मत्तैर्नवजलधरध्वानहृष्यन्मनोभि
र्नृत्यारम्भप्रकटितबृहद्बर्हदीर्घप्रसारैः ।
शुक्लापाङ्गैः श्रयति शतशश्छन्नसानुप्रदेशै
रन्तर्विद्युत्स्फुरितललितस्येन्द्रचापस्य लक्ष्मीम् ॥

(४८)

शृङ्गोत्तुङ्गान् सुविपुलकटस्रावविदानार्द्रशुण्डान्
यूथाधीशान् जलदमलिनान् दन्तिनो दृप्तभावाः।
अभ्रभ्रान्त्या क्षणमपगतोच्चण्डसंग्रामवाञ्छाः
सिंहा यत्र ध्वनिपरिचयात् हन्तुमुच्चैर्यतन्ते॥

(४९)

मुग्धा यत्र प्रियविरहजक्लेशशीर्णाभजन्ते
विश्वाधीशं प्रयतहृदयाः कान्तवक्त्रेक्षणाय।
बालायत्नात् परभृतनताः मादृशाः स्वीयरावै-
श्चित्तस्थैर्यात् विघटय पुनर्येन दुःखं व्रजेयुः॥

(५०)

गुञ्जद्भृङ्गे द्विजपतिकरप्लाविते शीतवाते
यस्योत्तुङ्गे स्फटिकशिखरे मुग्धसिद्धाङ्गनानाम्।
कान्ताश्लेषश्लथतनुभृतां स्वर्गसौन्दर्य्यभाजां
प्राप्सत्युच्चैर्द्विज सुविपुलाभ्यर्थनं कूजितं ते॥

(५१)

सायंसिंहानुसरणविधेः संनिवृत्तान् समीरो
वर्त्मक्लान्तान् शवरयुवकान् देवदारुद्रुमोत्थः।
यत्र स्वैरं विहितशयनान् निर्झरस्नातशीतः
सुस्थीकर्त्तुं प्रवहतितरां भृत्यवत् सानुदेशे॥

(५२)

चिह्नैरेवंबहुभिरनिशं लक्षितं तं गिरीन्द्रं
गौरीभर्त्तुः प्रणयलतिकामूलभूतं निरीक्ष्य ।
तस्यैवोच्चैः शिखरनिकरैः सन्धृतं भूमिनाकं
कामं दृष्ट्वा प्रविश सफलीकृत्य नेत्रे नितान्तम् ॥

(५३)

उच्चैरुच्चैः स्फटिकशरणं न्यकृतोच्चाद्रिशृङ्गं
वात्यालोलैः परिवृतगृहं वैजयन्तीसहस्रैः ।
व्योमस्पर्शिध्वजसुरगणा वासहर्म्यैरसंख्यै
रातन्वानं स्ववसतिजनोद्दामदैवैकभक्तिम् ॥

(५४)

नार्यो यत्रोल्लसितहृदयाः स्वर्गसीमन्तिनीनां
सौन्दर्य्योत्थं मदमतितरां देहकान्त्याहरन्ति ।
सत्यारूढस्मरविलसिता गाढतारुण्यदृप्ताः
स्वःसाम्राज्यं विबुधसदृशाः स्थापयन्ते युवानः ॥

(५५)

कोपोयत्र प्रणय कलहे प्रार्थना प्रेमदास्ये
भ्रान्तिर्गेहेदृशिकुटिलता मत्तता सीधुपाने ।
बन्धोनीवावलकनिबहे वक्रता कुन्तला च
क्षीणासुच्चैः प्रथयति सदा स्वर्गसौभाग्यलक्ष्मीम् ॥

(५६)

यस्यालिन्दे कनकरचिते सेविता: मान्यवातै:
काश्मीरीया सुलभसुरभिक्रीड़िता निद्रिताङ्गै: ।
कान्तोत्सङ्गप्रणयिवपुषो योषितो मुग्धचित्ता
स्तारामालागणननिपुणा नाथसुल्लासयन्ति ॥

(५७)

तस्यप्रान्तोपवननिकरे केशरैश्छन्नभूमौ
काश्मीरस्य व्रततिकुसुमैश्छन्नकृष्णाङ्गयष्टि: ।
रावस्रावै: परभृत चयो दर्शितातिथ्यकृत्य
स्त्वांसम्प्राप्य स्वजनममलं तोषमेष्यत्यनल्पम् ॥

(५८)

तान् प्रत्यङ्गप्रणयभरत: कूजितै रात्तयत्न:
साधो तीव्रादरसुरचितं साधुशीलंप्रदर्श्य ।
आत्मीयानां कुशलमनघंख्यापयित्वासुशीलै
र्वत्मक्लेशानपनय पिकै रञ्चितस्तै रनल्पान् ॥

(५९)

स्थित्वाकञ्चित्समयमखिलश्रान्तिसुखै र्विहाय
तेषामेकं पथिपरिचयप्रार्थनातोगृहीत्वा ।
नित्यानन्दो पवनशरणं मत्प्रियावासपुण्यं
याया: सायं स्थिरतरमना: शीघ्रयायिन् मनोज्ञम् ॥

(६०)

तत्रारामे बहुल कुसुमामोदरम्य प्रवाते
सौधोत्सङ्गप्रणयिनिसुधालेपशुभ्रे प्रकोष्ठे ।
इन्दुज्योत्स्नाविशदशयनस्यैकदेशेनिषण्णो
यास्यत्यक्ष्णोः खलुविषयतांकोऽपिवङ्गोङ्गवस्ते ॥

(६१)

कर्णप्रान्तप्रणयिविकशद्दारिज श्रीभृदक्षो
विभ्रद्गौरींच्छविमपियुवा वक्त्रशोभाजितेन्दुः ।
ओष्ठोद्भासिस्मितविकशितक्षुद्रमुक्तारदश्रीः
कामः साक्षादवधृतवपुर्मादृशां मोहनाय॥

(६२)

ज्ञात्वास्माकंहृदयदयितं रम्यरूपं तमेव
प्राणक्षोभप्रशमनसुधा साम्यमायान्तमुच्चैः ।
दर्शं दर्शं विगतपथज श्रान्तिजालो गवाक्षे
स्थित्वावक्तुं कमपिसमयं सम्प्रतीक्षस्व साधो ॥

(६३)

प्रायः सायं युवजनमनः कृत्यसम्पादनोत्थां
श्रान्तिंगाढ़ां परिगमयितुं तिष्ठति व्याकुलं सत् ।
तस्मात् तस्मिन् हृदयविरहव्याधिसुज्जीवयन्ती
वार्त्ताविद्या नहि परभृत त्वं वमुच्चैं विभाव्य ॥

(६४)

अप्यन्यस्मिन् विहितहृदये कर्म्मणिप्राणनाथे
नैवाविद्याभिलषितजनप्रेरिता प्रेमवाणी।
तीव्रोद्वेगात्प्रणयिमनसो ऽवश्य सम्पादनार्थं
गच्छेत्कृत्यं यदिविफलतां दूषितं स्यात्तदैतत् ॥

(६५)

बन्धुः कश्चित्समयवशतस्तत्र तिष्ठेत् तदाचेत्
काव्यालापव्यसननिरतश्चेतसोमोहनाय।
कातर्य्योक्तिर्न्नुमम तदा वेदितानूनमेष
त्युच्चैर्गूढोपहसितमये गाढनैराश्यपूर्णम् ॥

(६६)

सञ्चिन्त्यैवंबहुलमबलादुःखसम्पादकोर्थं
तावत् कस्मिन्नपितरुवरे स्थीयतां बद्धरावः।
यावत् सर्व्वं समयविहितं कृत्यजातं समाप्य
प्राणेशो मे शयनशरणे नैतिनिद्रांकथञ्चित् ॥

(६७)

आलोक्यैवं कथमपि मम प्राणनाथंप्रसुप्तं
चिन्तारेखानिचितममलं पाण्डुभालंवहन्तम्।
यायास्तस्मिन् मृदुतरगतिः पूर्व्वं दिष्टे गवाक्षे
प्रोद्यच्चन्द्राति शिशिरकरव्याहतध्वान्तजाले ॥

(६८)

तत्रोद्दीच्यामृतकररुचि प्रेयसोवक्त्रबिम्बं
मत्वात्मानंप्रतिनिधितया मेत्वमुन्मील्य नेत्रे ।
प्रीतिस्नेहासुलभललितच्छायया दीपितं तद्
आशावल्लीविकशितचिरप्रार्थ्य पुष्पैकशोभं ॥

(६९)

चिन्तारेखा निचय निचितं पूजितं नेत्रनीरै
र्दीर्घश्वासव्यजनपवनापाकृतश्रान्तिखेदम् ।
मत् सौभाग्यात् कमपिगुरुभिः स्वप्नवन्धोः प्रसादैः
प्रत्यानीतं नयन सरणिं त्वामवक्त्रेन्दु बिम्बन् ॥

(७०)

दृष्ट्वोत्थायप्रणयभरतः कम्पमानाङ्गयष्टिः
आश्लेषायस्वभुजयुगलं संक्षिपन् व्योम्निवेगात् ।
रुद्धस्पर्शाद्विघटितसुख स्वप्नसौभाग्यलक्ष्मी
रन्तर्भ्राम्यद्विषमविरह व्याधि दीनाननश्रीः ॥

(७१)

पश्चाद्दीच्यान्तकरकरान्मूर्च्छदव्यक्तशोभान्
संस्मृत्योच्चैः किमपिविगतं जालमार्गप्रविष्टान् ।
गाढ़ोत्कण्ठाविकलकरणश्च द्भवेदात्तदैन्यः
सुस्थीकर्त्तुं कृतकुहुरवःप्रक्रमेथास्तदालम् ॥

(७२)

स्निग्धै रादौ स्वकुहुवचनैःकाममाश्वासयन्नात्
पश्चोत्क्षेपोत्थमृदुपवनैस्ताड़यन्नङ्गतापम् ।
मां संस्मृत्योन्मथितहृदयां दीर्घविच्छेदगोसां
वाक्यैरेभिर्विरचयमिथः क्व गतान्ते निदानम् ॥

(७३)

कर्णाकृष्टप्रियधनुरसौ निर्दयःपुष्पचापो
नत्वामेकं तरुण नियतं वेद्धु मन्त्रात्तयत्नः ।
तद्वक्रेन्दोः स्मितसितकरैःपूर्व्वसन्तप्ततापा
वध्या काचित्त्वदधिकतरं त्वत्कृते तेन मुग्धा ॥

(७४)

वक्षीयासौ सरलहृदया वञ्चिता वामधात्रा
दूरावास प्रणयि दयिता दीर्घविच्छेदखिन्ना ।
आयातोऽहं विषमविरहव्याधिशान्त्यर्थमस्या
वक्तुं नाथे दलितहृदयोहामदुःखैकवार्त्ताम् ॥

(७५)

तन्निर्दिष्टैर्बहुभिरनघैर्लक्षणैस्त्वामुपेतं
दृष्ट्वासोऽयं त्वमसिवहुधेत्येवमुच्चैर्विभाव्य ।
संलक्ष्यैवं विकलमनसं तत्कृतेत्वापि वक्ष्ये
त्वद्विच्छेदः किमिवतनुते तत्रदीरात्म्यमद्य ॥

(७६)

नेयंरीति:सुजनमहिता प्रेयसांदु:खवार्त्ता
स्निग्धेवन्धौ कथमपिजनै दूरसंस्थे निवेद्या।
वाक्यंचैतत् हृदयनिलयाद्दूरमुत्क्षिप्यतस्या
विच्छेदाधेः प्रशमनकृते चेष्टितंमेन दूष्यम्॥

(७७)

त्यक्त्वाकार्य्यादहनिसरलां तांत्वदेकाग्रचित्तां
आगच्छामि त्वरितमबले त्वांविनाजीवनं मे।
नस्थायीतिप्रणयवचनै रेभिराश्वास्य यस्मिन्
आयातस्त्वं विगतकरुण: पादपाथोज लग्नाम्॥

(७८)

संमुग्धा सा तदवधिमहा विप्रयोगे पयोधौ
गाढ़ोत्कण्ठाविषमबड़वा वह्निवह्नौ विशाले।
संमज्जन्ती विलुलितकचैः स्नेहसम्पर्कशून्यै
रुद्धाराधं मलिनमलिनै रङ्ककैर्याचते त्वाम्॥

(७९)

ताम्बूलोत्थोरदवसनयोर्दृश्यते नैवरागो
नोवातुल्यावतचरणयोर्लक्ष्यतेऽलक्तकश्री:।
रूक्षस्पर्शा कठिनकठिना स्नेहसम्पर्कहीना
गाढ़ोत्कण्ठां दिशति सुहृदामेकवेणीच तस्या:॥

(८०)

अन्तस्तस्यामनसिजशरीरोत्पातसन्तापवह्नि
श्चिन्तावातादुपचितवपुर्नैवलब्धावकाश: ।
हन्ताश्चर्य्यं नयनसलिलं वान्धवीकृत्यगाढ़ं
वाह्याङ्गेषु प्रथयतितरामाधिपत्यं स्वकीयम् ॥

(८१)

चित्तारूढ़ प्रवलविरह व्याधिवैषद्रुमाणां
मन्ये तस्या विलसतितरां पक्कतो च्चै:फलेषु ।
नोचेदङ्गेषूति सुललितेष्वद्यगाढ़प्रकाशा
कस्माद्धेतो रुपचितवती पाण्डुतानल्पमात्रा ॥

(८२)

तस्या: पूर्वं सुगठिततरं बन्धुनेत्रोत्सवार्थं
मुग्धं बिभ्रद् यदिह सकलामङ्गमुन्निद्रकान्तिम् ।
धिग्धातारंतदिदमधुना लब्ध वैकल्य मुच्चै
रच्णोर्वाष्प प्रचयजनकं कार्श्यमाधौ बिभर्त्ति ॥

(८३)

मल्लीमालामलयपवन: कौमुदी शीतभानो:
पूर्वं तस्या विदधु रनिशं कामपि प्रीतिमुच्चै: ।
हन्ताश्चर्य्यं दयितविरहे ते पुन र्दु:खिताया:
साच्चात् कारंवत कथमपि प्राप्य लज्जां व्रजन्ति ॥

(८४)

कामारम्भो विधिरयमसौ निर्दयः पुष्पचापो
मन्दायातं मलयमरुता मिन्दुरनिद्ररश्मिः ।
व्रीड़ाधिक्यादिय मशरणा त्वञ्चदूरप्रवासो
तिष्ठेद्धैर्य्यं वदकथमिव प्राणबन्धोऽबलायाः ॥

(८५)

आदायोच्चैः प्रकृतिरनिशं सारभूतं जड़ेभ्यः
कुन्दज्योत्स्ना किशलनलिनी कोकिलालिस्वनेभ्यः ।
प्रायो दिक्षु प्रियलिपिकरी मूर्त्तिमुच्चैस्त्वदीया
मक्ष्णोस्तस्या लिखति बहुशश्चेतसो मोहनाय ॥

(८६)

स्थित्वा स्थित्वा कथमपि पुरश्चन्द्रपादस्यराज्ञा
वुत्थायालं कथयति सखीं विप्रयोगाब्धिमग्ना ।
मत्प्राणेशः शयनशरणे तिष्ठति व्याकुलः सन्
कर्त्तुं युक्तं किमिह सखि मे भूषणार्थं विलम्बम् ॥

(८७)

इत्थं नित्यं विषमविरह व्याधिशोष्यच्छरीरा
मिन्दोर्दैन्यं दिनकरकरासङ्गजन्यं वहन्तीम् ।
तामालीर्मा नयनसलिलैः सार्द्धमाविर्भवन्तो
प्रायो मूर्च्छा रचयतितरां व्यक्तसन्तापदैन्याम् ॥

(८८)

प्रत्येकं ता विरहजदशा स्तामवाप्यात्त दैन्यां
कुर्वन्त्याद्या नवनवतया स्वप्रतापप्रकाशम् ।
एका साधो कमपि समयं वासनारुद्धमार्गा
सौभाग्यान्नो स्थितहृदयां नागताद्यापि शेषा ॥

(८९)

तामीक्षित्वा शमनशरणं प्रस्थिताय प्रवृत्तां
त्वद्विच्छेद प्रलयपवनोन्मूलिताशावलम्बाम् ।
आयातोऽहं बिकलहृदयस्त्वत् समीपंत्वया च
गत्वाभाशोन्मथितमनसो जीवनं रक्षणीयम् ॥

(९०)

यद्यानन्ताादिहतबसखे कर्मणामद्ययात्रा
कार्य्याधीन त्वरितमुचिता नेतिचिन्ताहृदिस्यात् ।
दुरीकर्त्तुं खलुसमुचित्ता सापुनर्धर्मबन्धो
प्राणा:कार्य्यादपि कलुषभीव्याकुलै: पालनीया: ॥

(९१)

त्वद्विच्छेदप्रलयपवनोन्मूलिताशालतासा
संपश्यन्ती खलुदशदिश: शून्यशून्याविशीर्षा ।
संस्मृत्योच्चै: प्रणयवचनंपूर्व्वमुक्तं त्वयायत्
त्वांप्रत्याहप्रणयिन मसावेतदस्माम्मुखेन ॥

(८२)

नत्वांवच्म्ये किमपिदयित प्रार्थये वाकथञ्चित्
लब्धुं युक्तः सतुविधिरिह प्रार्थनांवाच्यतां वा ।
एकाधीनप्रणयहृदयां योहिमांसंविधाय
तस्यागाधे विरहजलधौ मज्जयत्युज्झितश्रीः ॥

(८३)

मत्तुल्यास्ते दयितशतशःसन्तिनाथ्यःसुभाग्या
स्त्वत्तुल्योमेजगति हृदयेशानऽएकोपिनास्ति ।
वक्तुंशक्तः किमसि विधिना भीषणोऽयंविधिर्नः
सृष्टोऽपूर्वःकथमिह विभोजीवनोत् कन्तनाय ॥

(८४)

कोऽयंनाथ प्रणयिनिजनेऽज्ञातसंसारशाठ्ये
त्वत्प्रेमाब्धेःसुष्टुतिसलिलैः चीणनैराश्यतृष्णे ।
दासीभूते विधिरकरुण श्चित्तसन्तापनाय
प्रेमोन्मत्ते मयिवितनुषाचारसौरम्यपूर्व्वः ॥

(८५)

चेतोऽस्माकंकुसुमसदृशं कौसुमेषोर्निपातात्
तीव्रादेतत् प्रिय तदधुनाभिन्नधैर्य्यैकवृन्तम् ।
हन्तेदानीं हृदयवसते त्वद्वियोगोष्णरश्मि
र्गच्छेदेवं दृढ़सुपचयं चिन्तयास्मद्गतिःका ॥

(८६)

पूर्णश्चन्द्रो वियतिविमले दूरसर्पंत् करौघो
मन्दायातामलयमरुतो गन्धराशीन् किरन्ति ।
स्थित्वास्थित्वा परभृतकुलैर्गीयते षट्पदैश्च
दूरस्थे त्वय्ययि वदविभो दर्शयेयं कमेतत् ॥

(८७)

कोवा दृष्ट्वा प्रणयभरतः फुल्लवक्त्रारविन्दो
मामाधायोच्छ्वसितहृदयां वक्षसि प्रेमवाचा ।
त्वद्वक्त्रेन्दौ स्मितकरभृति प्रेयसिप्रेक्षतांक
चन्द्रज्योत्स्नां मलिनमलिनां मोहयेदेवमुग्धः ॥

(८८)

उन्मत्ताहं विषमविरहव्याधिपाथोधिमग्ना
किम्वाकथ्यं हृदयदयित त्वामनल्पंब्रवीमि ।
ज्ञातुं तन्मेमथितमनसो नैवसामर्थ्यमस्ति
धन्तव्यंतत् हृदयसरसीजातभानो त्वयाद्य ॥

(८९)

किंनोदेति प्रियतमततो यत्र तं वासवेश्म
ज्योत्स्नाकान्तः कुसुमसमयः शीतदाक्षिण्यवातः ।
किम्वास्माकं दलितमनसां जीवनोत्क्रन्तनार्थं
तेषामद्योल्लसति नितरां तीक्ष्णतान्यथनैव ॥

(१००)

किन्तैरर्थैर्यदि परिजनो दीर्घविच्छेददुःखं
चिन्ता वामात् प्रविघटयितुं नो समर्थोऽतिखिन्नः ।
प्राणोत्सर्गे प्रकटित हृदुन्मूलिताशावलम्बो
यन्नाभार्थं वद गृहपते दूरदेशप्रयाणम् ॥

(१०१)

आगन्तव्यं त्वरितमिह ते नाथदासीजनस्य
प्राणानुच्चैःप्रमथनभृतो रक्षितुं मे कृपालो ।
नो सामर्थ्यं मम कथयितुं प्राणनाथे त्वयीदं
तास्त्वन्या या महितमनुजानाज्ञया क्रीड़यन्ति ॥

(१०२)

तस्मादित्थं मथितमनसं विप्रयोगाब्धि मग्नां
त्वत्पादाब्जे क्षणमसुलभं प्रार्थयन्तीं सदा मां ।
आकर्ण्यास्मात् प्रियतम चिराद्दुःखितां दूतवक्त्रात्
यत्कर्त्तव्यं तव सुमनसो बोधिता तच्च मे वाक् ॥

(१०३)

हित्वाप्राचीं कुमुददयितः प्राप्यकाष्ठां प्रतीची
मस्तंयातः किरणकलितास्ताद्रिशृङ्गोऽयमारात् ।
किं पश्येयं पुनरपि तवोच्चगण्डविच्छेदशीर्षा
राकाज्योत्स्नां चरणनलिने धारयित्वाङ्कमध्ये ॥

(१०४)

मत्प्राणेशं परभृतशतैरेवमन्यैर्वचोभिः
शीघ्रायातं प्रचलमनसं संविधाया मृषा वाक् ।
प्रत्यागस्योन्मथितहृदयां प्रेमपूर्णैरमुत्र
तन्निर्देशै र्विकलकरणां मामलं जीवयेस्त्वम् ॥

(१०५)

पूर्व्वाशावदना दिवाजदयितश्चन्द्रोऽब्धिमध्यादिव
प्रोद्भूतो भुवनप्रसारिकिरणख्यातिर्वशिष्ठान्वयात् ।
विद्वद्वृन्दविनिद्रदर्पनलिनी नागाधिनाथायितः
श्रीताराचरणोद्विजः सुविदितः पाण्डित्यवारांनिधिः॥

(१०६)

तस्यात्मप्रभवः सुधीः प्रमथनाथाख्यःकविःसुव्रतः
काशीराजकृपासुरद्रुमसहाच्छायाश्रयाऽव्याकुलः ।
ध्यायन् स्वर्गततातपादविकशद्वन्द्वाब्जमिष्टप्रदं
काव्यं कोकिलदूतमेतदनघं प्रीत्यै सतां निर्म्ममे ॥

॥ समाप्तमेतत् ॥

॥ शुभमस्तु श्रीरस्तु ॥